This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगजाननाय॥ श्रीवेदपुरुषायनमः॥ श्रीपरम[illegible]नमः॥ ॥[illegible]रामवंशायनमः॥
॥ॐ हरिः ॐ ईशावास्यमिदꣳसर्वंयत्किंचजगत्यांजगत्॥ तेनत्यक्तेनभुंजीथामा
गृधः कस्यस्विद्धनं॥१॥ ॥अस्यार्थः॥ येनात्मनापरेणेशाव्याप्तंविश्वंचराचरं॥ ना३
सतज्ज्ञानस्वरूपेणतद्देवाहंसदात्मकं॥२॥ ईशावास्यादयोमंत्राज्ञानकर्मप्रतिपा
दकाः॥ अखंडेकरसेशुद्धेब्रह्मण्येवसमन्विताः॥३॥ कर्मसंबोधकावेदा
नचतेब्रह्मबोधकाः॥ इतिमीमांसकाप्राहुस्तन्नसत्यकदाचन॥४॥ अकर्मशी
षमात्मानंनिर्गुणंप्रकृतेपरं॥ अशरीरंसदामुक्तंनित्यंशुद्धस्वभावकं॥५॥
सत्यज्ञानमनंतंचनिःकर्त्तृनिःक्रियंध्रुवं॥ बोधयंतियतःसर्वसर्ववेदाः
षडंगकाः॥६॥ अतएवहितेमंत्राब्रह्मतत्त्वप्रबोधकाः॥ ईशाद्यास्त्वंव्याप्तं

ACC-NO: ~~1462~~ M1059
Title! – ईशावास्यकारिका.
Author :- ~~सर्वानंदी सरस्वती~~ रामानंद सरस्वती
Subject:- ~~वेदांत~~
पत्रे! – 13

KKSU LIBRARY RAMTEK 441 106 M1059 Dist Nagpur

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैलोक्यंसचराचरे ॥६॥ वासितंभुवनंसर्वंसत्यमेवं
वमिवेदंजगत्यामुपलक्षणं ॥७॥ जगत्सूत्रस्त्वपरमंब्रह्मैवेदमितिश्रुतः ॥ ये
स्माद्ब्रह्मात्मकंसर्वंतस्मात्त्यक्तेनसर्वदा ॥८॥ पालयेत्स्वमात्मानंस्व या
स्वरूपंनिरंजनं ॥ सागरशब्देनवाप्यत्रसन्यासः परिकीर्तितः ॥९॥ सन्या
स्यसर्वकर्माणिब्रह्मैवास्मीतिभावयेत् ॥ रक्षणीयस्त्वयंवात्मासंसारा
दृशुकल्पितात् ॥१०॥ आत्मैवेदंजगत्सर्वंधनंनैवास्तिकस्यचित् ॥ गृद्धिं
वैधनविषयान्माकार्षीस्त्वंकथंचन ॥११॥ स्विद्धिसनर्थकोवात्रवाक्षेपोवा
भविष्यति ॥ स्वात्माभिन्नंपरस्वंकिंकस्यचिद्धिधनंधनं ॥१२॥ सुगंधवंद
नेनैवदुर्गंधश्छाद्यतेयथा ॥ नामरूपात्मकं ... स्वात्मानाच्छादितंतथा ॥१३॥ मा १
तस्मादात्मैवद्रष्टव्यःश्रोतव्यःसवदवेह ॥ ... एववेद ... उथमावानुरू
पितः ॥१४॥ इत्येकोमंत्रोव्याख्यातः ॥ ॥ कुर्वन्नेवेहकर्माणिजिजीविषे
च्छतंसमाः ॥ एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरे ॥१॥ मंत्रार्थः ॥ सर्व
कर्माकर्माणिसंन्यस्यमंतव्यःपरमेश्वरः ॥ तदशक्तस्यकर्माणिकर्तव्यानिश्रु
तिर्जगौ ॥१॥ ... कर्माणि ... णिव्यवहारात्सहानरः ॥ कुर्वन्जीवितुमिच्छेद्द्रु
शतसंवत्सरान्स्वयं ॥२॥ तावद्धिपुरुषस्यायुःशतायुरितिचश्रुतेः ॥ एवंप्रकारेण
तुत्वयिनरमात्राभिमानिनी ॥३॥ प्रकारांतरेनैवास्तीनकर्मलिप्यतेयथा ॥ मर्म
ईश्वरार्पणबुध्यातुकर्मकुर्वन्नलिप्यते ॥४॥ प्रसीदतिपरोह्यात्माशुद्धांतःक
रणेत्वयी ॥ इतिद्वितीयमंत्रार्थः सम्यगेवनिरूपितः ॥५॥ इतिद्वितीयमंत्रार्थः

उत्तमिहात्रागिदि १

(२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समाप्तः ॥२॥ अथ तृतीयमंत्रः ॥ असुर्यानाम ते लोका अंधेन तमसावृताः ॥ ता

ऽस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः ॥३॥ ॥ मंत्रार्थः ॥ अविवेकस्य सं

सारे विवेकान्नैव विद्यते ॥ अविवेकनिदाघार्थं मंत्रोयं संप्रवर्त्तते ॥१॥ आ

त्मज्ञानं समुपेक्ष्याथ देवाये भोगलंपटाः ॥ असुरा एव ज्ञातव्या अल्पधर्मब

हिष्कृताः ॥२॥ येन्यथा संतमात्मानमकर्तारं स्वयंप्रभं ॥ कर्त्ता भोक्तेति मन्वं

ते त एवात्महनो जनाः ॥३॥ स्वात्मनश्च स्वरूपस्य तिरस्कार प्रहेतुनः ॥ अदर्श

नात्मकेनैव चांधेन तमसावृताः ॥४॥ ज्ञेयदेहं परित्यज्य संसारंति पुनः पुनः ॥

एकेव परमात्मानं न जानंति परात्परं ॥५॥ योन्यथा संतमात्मानमन्यथा प्र

तिपद्यते ॥ किं तेन न कृतं पापं चौरेणात्माप...णा ॥६॥ ... वाक्यं स्मृतिः २

शास्त्रसंमतं तन्नसंशयः ॥ अपि गच्छंति पाव... नाभावन... पथा ॥७॥ तस्मा

ज्ञानं पुरस्कृत्य सन्यसेदिह बुद्धिमान् ॥ स्वात्मानं परमं ज्ञात्वा मुच्यते जन्मबंधना

त् ॥८॥ इति तृतीयो मंत्रः ॥ अथ चतुर्थो मंत्रः ॥ अनेजदेकं मनसो जवीयो नैनद्दे

आ वा आप्नुवन्पूर्वमर्शत् ॥ तद्धावतोन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधा

ति ॥४॥ ॥ अथ मंत्रार्थः ॥ कीदृशीं तत्परं तत्त्वं पूर्वमंत्रेण कीर्तितं ॥ तदर्थं प्रति

पत्यर्थं चतुर्थोयं प्रवर्त्तते ॥१॥ अनेजत्परमं तत्त्वं स्वतश्चलनवर्जितं ॥ एजृ कंप

न इति धातोर्ण्योपि तथा विधिः ॥२॥ अचलं सत्परं ब्रह्म नित्यमुक्तस्वभावकं ॥

एकमेवाद्वितीयं च सत्यज्ञानस्वरूपकं ॥३॥ संकल्पलक्षणाच्चास्मान्मनसो वे

गवत्तरं ॥ नैव नं तत्त्वमाप्नुवंतो देवा येनक्षरादयः ॥४॥ ... ...प

५

मं॥निर्मलंत्वां॥ तद्भावतोन्यान्वेगेनसर्वान्व्याप्यैव [illegible] ॥५॥ [illegible]
इतिश्रुतेर्णिस्मिन्परब्रह्मणिकेवले॥ अपः कर्माणिसर्वाणिमातरिश्वादधा
ति च॥६॥ अंतरिक्षेस्वयंयातिसूत्रात्मापवनःस्वयं॥ कर्मचतत्फलंचैव
धारयत्येवसर्वदा॥७॥ इतिसंक्षेपतोमंत्रश्चतुर्थोपिसमापितः॥ प्रसीद
तिपरोदेवः सर्वभूतगुहाशयः॥८॥ इतिचतुर्थमंत्रार्थः समाप्तः॥ अथपं
चमोमंत्रः॥ तदेजतितन्नैजतितद्दूरेतद्वंतिके॥ तदंतरस्यसर्वस्यतदुसर्व
स्यास्यबाह्यतः॥५॥ अथमंत्रार्थः॥ नमंत्राणांस्वामिदिदोषकत्वनविद्यते॥ उ मं
क्तमेवयदेतदर्थंब्रह्मतत्वप्रकाशकं॥१॥ दुर्विज्ञेयंपरंब्रह्मसत्सत्तानमनंतकं॥
निःकलंनिःक्रियंशांतंनिरवद्यंनिरंजनं॥२॥ [illegible] मृतस्य [illegible] सेतुंदग्धेंधनमि ३
वानलं॥ इतिवाक्यंयतःश्रोत्रिब्रह्मसत्संचप [illegible] ॥३॥ तद [illegible] तिपरंब्रह्मब्रह्म
विष्णुशिवात्मकं॥ साकारंमाययाभातिनिराकारंचवास्तवं॥४॥ उपाधिच
लनेनैवचलनंनुविभाव्यते॥ तन्नैजतिपरंब्रह्मनिर्गुणंप्रकृतेःपरं॥५॥ त
मं दूरेपरंब्रह्मसर्वदावाविवेकिनां॥ आप्राप्यत्वात्परंब्रह्मवर्षकोटिशतैरपि॥६॥
तदुतदंतिकेब्रह्मस्वात्मरूपंविवेकिनां॥ तद्बाह्याभ्यंतरेब्रह्मकार्यकारणवस्तुतः॥
पी ॥७॥ विश्वातीतंपरंब्रह्मविश्वस्यांतरेस्थितं॥ निरूपसर्वगंज्ञात्वामुच्यतेजन्म
बंधनात्॥८॥ इतिपंचमोमंत्रोयंसमासेननिरूपितः॥ मायातितंपरंशुद्धंरहस्यं
चप्रकीर्तितं॥९॥ इतिपंचमोमंत्रार्थःसमाप्तः॥ ॥अथषष्ठोमंत्रः॥ यस्तुस
र्वाणिभूतान्यात्मन्नेवानुपश्यति॥ सर्वभूतेषुचात्मानंततोनविजु [illegible] ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रार्थः॥ तत्त्वब्रह्मपरमैशुद्धं कर्मकांडेनैवलक्ष्यते॥ कर्मस...
प्रमुच्यते॥१॥ कर्मणालभ्यतेब्रह्मज्ञानान्नैवतुप्राप्यते॥ इतिमीमांसकोप्राकुस्तेषो
पक्षोनिरस्यते॥२॥ यस्तुसर्वाणिभूतानिपरिब्राट्स्वयमेवहि॥ तानिसर्वाणिभूता
नीत्यात्मन्येवप्रपश्यति॥३॥ सर्वभूतेषुचात्मानंसर्वभूतगुहाशयं॥ तस्मादेवतु त ४
विज्ञानान्नैवविचिकित्सति॥४॥ स्वस्वरूपपरिज्ञानात्संदेहंनकरोत्ययं॥ मा
ध्यंदिनस्यपाठेतुव्याख्यानेपरिकीर्तितं॥५॥ घृणादयाजुगुप्सावाजायतेप्र
हृदर्शिनः॥ नतुनिभेदमद्वैतमात्मैकत्वंप्रपश्यतः॥६॥ इतिषष्ठोपिमंत्रार्थ
समासेनमयोदितः॥ अनेप्रियतांदेवः सर्वभूतगुहाशयः॥७॥ इतिषष्ठोमं ४
त्रार्थः॥ अथसप्तमोमंत्रः॥ यस्मिन्सर्वाणिभू ... पास्मैवा ... द्विजानतः॥ तत्र

कोमोहः कः शोकएकत्वमनुपश्यतः॥७॥ अथ ... र्थः॥ प्रति ... तदेतिस्वात्मानं
प्रकृतेःपरं॥ इतिप्रदर्शनार्थंतुसप्तमोयंप्रवर्तते॥१॥ यस्मिन्संप्रपश्यतेज्ञानंसर्वाहि
परमेश्वरं॥ इतिटीकानिर्देशार्थंतुशब्दोयंप्रवर्त्तते॥२॥ अस्मिन्ब्रह्मस्वरूपेतुनि
र्विकल्पेपरेव्यये॥ सर्वाण्यात्मैवसंदृष्टैर्ब्रह्मतत्वंविजानतः॥३॥ ब्रह्मैवसकलंवि क ४
श्वमहमस्मीतितत्पदं॥ पद्यतेगम्यतेनित्यंस्वस्वरूपंस्वयंप्रभं॥४॥ शोकमोहादि
संबंधस्तस्मिन्नैवतुविद्यते॥ अप्राणोह्यमनाःशुभ्र इत्यादिश्रुतिशासनात्॥५॥
अविद्याकार्यनिर्मुक्तेसंविद्रूपेपरात्मनि॥ शोकमोहादिसंबंधःकर्मब्रह्मणिभाव्य
ते॥६॥ इत्ययंसप्तमोमंत्रःस्वरूपप्रतिपादकः॥ सोहमस्मिःसएवाहंब्रह्मैवास्मीति
वाक्यतः॥७॥ इतिसप्तमोमंत्रोव्याख्यातः॥ अथअष्टम

(४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कायब्रणमस्नाविरंशुद्धमपापविद्धं॥ कविर्मनीषीपरिभ ... ॥

न्यदधाच्छाश्वतीभ्यः समाभ्यः॥८॥ टीका॥ अत्मात्मासकलंविश्वंतस्मिन्विश्वंप्र

तिष्ठितं॥ जीवाज्ञानवशादेवचाष्टमोयंप्रवर्त्तते॥१॥ आत्मानंसर्वगंशुद्धं निरूपधि

नुमंजसा॥ आप्नोतिसकलंकामंतस्मादात्मेतिगीयते॥२॥ सपर्यगात्सराधात्मा

सर्वव्याप्यव्यवस्थितः॥ यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा॥३॥ अंतर्बहिश्च

तत्सर्वंव्याप्यनारायणः स्थितः॥ इतिमंत्रोयमत्रास्तितस्माद्दोनविद्यते॥४॥

निर्विभागः स्वयंज्योतिरात्मैवसकलंजगत्॥ शुक्रज्योतिः स्वभावोयंनित्सचिन्मात्र

विग्रहे॥५॥ लिंगदेहविनिर्मुक्तः सर्वभूतगुहाशयः॥ एकभूतः स्वभान्यायंसर्वव्या

प्यप्रतिष्ठितं॥६॥ सभात्मानंपरंशांतंदेहत्रय ... र्जितं॥ नि ... द्रियंपरंज्ञात्वामु

च्यतेसर्वबंधनात्॥७॥ मायापाशविनिर्मुक्तंध ... र्मविवर्जि ... ॥ मनसोपिनियं

तारंसर्वसाक्षीणमव्ययं॥८॥ उपर्युपरिसर्वेषांभवितारंस्वयंभुवं॥ विभुसर्वात्मि

कंज्ञात्वामुक्तएवभवत्यसो॥९॥ अथवासपरोदेवः सर्वव्यापिनिरंजनः॥ सर्वगः

सकलंव्याप्यस्वयमेवव्यवस्थितः॥१०॥ व्यवहारेपिशुद्धोसौदेहद्वयविवर्जितः॥

बीजधर्मविनिर्मुक्तोनियंता सर्वदेहिनां॥११॥ परिभवतिकार्याणिपरिभूः स्वय

मेवहि॥ स्वातंत्र्येणभवतीतिस्वयंभूः परिविश्वभुक्॥१२॥ यथातथ्यतयेवायं

कर्त्तव्यार्थान्स्वयंप्रभुः॥ शाश्वतीभ्यः समाभ्यश्चप्रजापतिभ्यएवहि॥१३॥ प्रजा

भ्यश्चविभज्यैवदत्तवान्परमेश्वरः॥ तदेवंपरमात्मानंनित्यमुक्तस्वभावकं॥

॥१४॥ सोहमस्मीतिविज्ञायमुक्तएवभवत्ययं॥ इत्येवम ... मोपत्रस ... र ... वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपकः॥१५॥समाप्तःसर्वगोप्यात्मा नित्यंसर्वस्वभावकः॥ तोहमस्मी॥ १६॥ उच्य नि
तेसर्वतोभयात्॥१६॥ इत्यष्टमोमंत्रार्थःसमाप्तः॥ अथनवमोमंत्रः॥ अंधंतम
प्रविशंतियेसंभूतिमुपासते॥ ततोभूयइवतेतमोयउसंभूत्यांरताः॥१॥ टीका॥
सन्यस्यसर्वकर्माणिज्ञातव्यःपरमेश्वरः॥ इतिप्रथमवेदार्थःसम्यगेवप्रदर्शि म्य
तः॥१॥ अग्निहोत्रादिकर्माणितद्दृष्ट्यौनसर्वदा॥ कर्त्तव्यानिद्वितीयोपिवे
दार्थेयिप्रदर्शितः॥२॥ विरोधंदर्शयित्वातुतयोरेवहिमंत्रयोः॥ बृहदारण्यकेशा
स्त्रेव्यवहारोपिदर्शितः॥३॥ कामुकस्यतुसंसारोनिःकामस्यपरांगतिं॥ इतिप्रद
र्शनार्थंतुनवमोयंप्रवर्त्तते॥४॥ अंधमज्ञंतमायीतियेमायांसमुपासते॥ विमुक्ता
अपिसंसारान्नैकात्म्यंयेविदुर्नराः॥५॥ असंभ[illegible] वसोत्र[illegible] यातत्संप्रकथ्यते॥ ६
मायातत्वात्तुसंसारोजायतेसर्वदेहिनां॥६॥[illegible]त्तमोयी॥[illegible]संभूतांपरतानराः॥ पुनः
संभवनीवसंभूतिलिंगंसमष्टरूपमकं॥ माया॥ बीजस्यकार्यंतस्यात्मानंप्रवक्ष्य
ते॥ कार्यकारणनिर्मुक्तंज्ञात्वात्मानंविमुच्यते॥८॥ नवमोपिसमाप्तोयंसंक्षेपार्थ
प्रदर्शकः॥ समुच्चयाचिकीर्षार्थंदशमोमंत्रःप्रवर्त्तते॥९॥ इतिनवमोमंत्रार्थःस
माप्तः॥ अथदशमोमंत्रः॥ अन्यदेवाहुःसंभवादन्यदाहुरसंभवात्॥ इतिशुश्रु
मधीराणांयेनस्तद्विचचक्षिरे॥१०॥ टीका॥ संभवादन्यदेवाहुःफलंकार्यस्य
चिंतनात्॥ कारणाद्बीजरूपस्यचिंतनादन्यदेवहि॥१॥ इत्याहुर्वेदविद्वांसःफल
भेदंविचक्षणात्॥ श्रुतवंतोवयंह्येवमाचार्याणांमहात्मनां॥२॥ व्याख्यातवंतो
येस्माकंगुरवःस्तत्वदर्शिनः॥ तेषामेवहितद्वाक्यंफ[illegible]दर्श[illegible]

(7)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेद्दात्नुभेद्दोयंदर्शितोनतुवस्तुतः॥धीराणांपरमेवे... ...१ ...॥
ससुज्ञानेमनीतंवब्रह्मैवपरमेध्रुवं॥इतिदशमोमंत्रोपिसमासेनसमापितः॥
॥१५॥इतिदशमोमंत्रार्थःसमाप्तः॥अथएकादशोमंत्रः॥संभूतिंचविनाशंच
यस्तद्वेदोभयं सह॥विनाशेनमृत्युंतीर्त्वासंभूत्यामृतमश्नुते॥११॥टीका॥
संभूतिंकार्यरूपंचविनाशंकारणात्मकं॥एकादशोपिमंत्रोयंतयोरेकत्वदर्शी
कः॥१॥कार्यकारणयोरैक्यंयोवेदसततंनरः॥विनाशेनमृत्युंतीर्त्वासंभूत्या
मृतमश्नुते॥२॥यस्मिन्विनश्यतिकार्यंविनाशंकारणंपरं॥मायाबीजंतु
तस्योक्तंचैतन्यंकवलीकृतं॥३॥तयोपासनयामृत्युंतरत्यास्वाभाविकंत
मः॥हिरण्यगर्भोपासनायासंभूत्यामुच्यते ... ॥४॥आ... विद्याविधिःसो
पपर्कारणमुच्यते॥साक्षीचेताजगद्भूज ... मीतिरि... तो॥५॥कार्या
कारणरूपंचब्रह्मैवकेवलंशिवं॥कार्यका...निर्मुक्तंपरंज्ञात्वाविमुच्यते॥
॥६॥इत्येकादशमंत्रोपिसमाप्तस्तत्वबोधकः॥ब्रह्मैवपरमेशुद्धंब्रह्मैवा
हंसदद्वयं॥७॥इत्येकादशमंत्रःसमाप्तः॥अथद्वादशोमंत्रः॥अथत्रयोद
शोमः॥अंधंतमःप्रविशंतियेविद्यामुपासते॥ततोभूयइवतेतमोय
उविद्यायांरताः॥१२॥इतिद्वादशमंत्रोयंःसमाप्तार्थप्रदर्शकः॥समापि
तःस्वयंशुद्धंब्रह्मैवाहंसदद्वयं॥१॥टीका॥कर्मणाबध्यतेजंतुर्विद्ययाचवि
मुच्यते॥इतिप्रदर्शनार्थेनुद्वादशोयंप्रवर्तते॥२॥अंधदमृत्युंतमोयीतिके
वलंकर्मचिंतकः॥देवतोपासकायेचतेपियांतिपुनस्तमः॥२॥एकैकोपास

७

(४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...न्ना॥ ... ना पुनः पुनः॥ एकनवद्वयसेवीनु ... पुन...
इति द्वादशो मंत्रः समाप्तः॥ अथ मंत्रः॥ अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥१३॥ टीका॥ एकैतं तु न चैवास्ति
रविद्यावरयोरिव॥ पृथगेव दर्शयितुं कर्मविज्ञानजं फलं॥१॥ त्रयोदशोऽपि
मंत्रोयं स्वयमेव प्रवर्त्तते॥ विद्यया अन्यदेवाहुरग्निहोत्रादिकर्मणा॥
पृथगेव फलं बुधः॥२॥ अविद्यया अन्यदेवाहुः श्रुतवंतो वयं वाक्यं धीराणां
तत्त्वदर्शिनां॥३॥ व्याख्यातवंतो ये सम्यग्गुरवो ब्रह्मतत्पराः॥ तेषां वाक्यं ब्रह्मतत्
त्वबोधकं परमेश्वरं॥४॥ इति त्रयोदशो मंत्रः पृथगर्थप्रदर्शकः॥ ब्रह्मतत्
त्वबोधकोऽपि समासेन निरूपितः॥५॥ ... दशो मंत्रः॥ अथ चतुर्द

शो मंत्रः॥ ॥विद्यां चाविद्यां च यस्तद्वेदोभयं सह॥ ... विद्यया मृत्युं तीर्त्वा विद्ययामृ
तमश्नुते॥१४॥ ॥टीका॥ पृथक् फलं विद्यते चेद् अग्निहोत्रादिकर्मणां॥ उपासनं
फलं नैव कथं वा क्रियते सदा॥१॥ प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्त्तते॥ फलं
सम्यक्प्र... थं कैवल्यप्रतिपत्तये॥२॥ अग्निहोत्रं च विद्यां च देवतोपास
नं परं॥ एकीकृत्य ... कैवल्यं लभते पदं॥३॥ पद्यते गम्यते वेति स्वस्व
रूपं निरंजनं॥ द्विविधं तत्परं ब्रह्म सगुणं निर्गुणात्मकं॥४॥ निर्गुणं वास्त
वं ब्रह्म सगुणं परिकल्पितं॥ कर्मविद्यामेकीकृत्य यस्तद्वेदोभयं बुधः॥५॥
... किल्बिषात् तु विद्यया अमृतमश्नुते॥ हिरण्यगर्भमानं ब्रह्मलोकनि
वासिनं॥६॥ तं प्राप्य तेन सार्धं तु परं ब्रह्माधिगच्छति॥ ... इति ...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रः संक्षेपणानिरूपितः ॥७॥ इतिचतुर्दशोमंत्राथः ॥ ॥ १ ॥
मंत्रः ॥ वायुरनीलममृतमथेदंभस्मांतं शरीरं ॥ ॐ मू क्रतोस्मरक्लि
बेस्मरकृतं स्मर ॥ १५ ॥ टीका ॥ उपासकफलं मंत्रः पंचदशास्त्वयं ॥ पुस्त
शाश्वतं कार्यरूपं चकृपयात्परं पुनः ॥ १ ॥ तत्रैवोपासनकः साक्षाद्वायुं
प्राणोगच्छ प्रार्थयते स्वयं ॥ संत्रामानं परं दिव्यममृतं शिवमव्ययं ॥ २ ॥
तिमे शीघ्रं लयं व्रजतु निश्चलं ॥ शाश्वतं शिवमव्यक्तं ब्रह्मैवाहंस
नातनं ॥ ३ ॥ अथेदानीं शरीरं मे भस्मीभवतिवैद्रुतं ॥ अमृतात्मस्वरूप
स्यब्रह्मतत्त्वस्यकेवलं ॥ ४ ॥ क्रतोस्मर निबीजायक्रतंकर्मशुभाशुभं ॥ १
दिराद्वीसिद्धार्थ्यान्क्रतोसिकत्पहस्मर ॥ कृतमुपासनंकर्मफलंदा

लुंचशाश्वतं ॥ ससंतमपरं ब्रह्मनिसमव्य यं ॥ ६ ॥ इतिपंचदशोमं
त्रः समाप्तः ॥ अथषोडशोमंत्रः ॥ अग्नेनयसुपथारायेअस्मान्विश्वा
निदेववयुनानि विद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउ
क्तिं विधेम ॥ १६ ॥ टीका ॥ उपासेननगंतव्यंकेनमार्गेपासीप्रतं ॥ इति
प्रदर्शनार्थं हिषोडशोयं प्रवर्त्तते ॥ १ ॥ मैत्रोमार्गदर्शयितुं ब्रह्मलोकगतिप्र
ति ॥ अग्नेप्रकारारूपोसि सोननेनयथानय ॥ २ ॥ प्रापयास्मान्महाभागब्रह्म
लोकेमनामयं ॥ विश्वानिदेवसर्वाणिज्ञानानिवयनानिच ॥ ३ ॥ विद्वान्जा
नासिसर्वज्ञप्रसीदवरदोभव ॥ वियोजयजुहुराणंकौटिल्यंपातकंमम
॥ ४ ॥ अंतकालेवरीवर्त्तंभराक्तास्तेपरस्परा ॥ नमउक्तिं विधेम...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

10

द परमेश्वर ।।५।। षोडशोपि च मंत्रोयं संक्षेपेण सम.
र्मं तदेवाहं सदोमिति ।।६।। इति षोडशो मंत्रार्थः समाप्तः ।। अथ सप्तदशो
मंत्रः ।। हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।। सोसावादित्ये पुरुषः
सोसावहम् ।। ॐ खं ब्रह्म ।। टीका ।। द्वारं विना कथं गंतुं शक्यते ब्रह्म मंदिरं
सत्यलोकस्य चात्मानं सूत्रभूतं सनातनं ।।१।। तत्प्राप्तिसाधनं द्वारं
मंत्रः सप्तदशः स्वयं ।। प्रवर्तते प्रार्थयितुमादित्यं सर्वरूपिणं ।।२।। हि
रण्मयेन पात्रेण सत्यस्य ब्रह्मणो मुखं ।। तीक्ष्णेन ज्योतिषा व्याप्तं गंतुं ने
व तु शक्यते ।।३।। रश्मिजालैर्निराकृत्य द्वारं मे देहि भास्कर ।। सत्यलोकस्य १०
सत्याख्यं ब्रह्म गंतुं च मे प्रभो ।।४।। मसंवत्सा... याविस्वरूपो हि तवाच्युत ।

अहं ब्रह्मैव परमं भवान् ब्रह्मैव केवलं ।।५।। अवरयो... तानि सत्यमेव ब्रवीम्यहं ।। पूर्ण
स्यात्पुरुषो ह्यसौ योसावादित्यमंडले ।।६।। देहेंद्रियाधियासाक्षी सोसावित्ति स्वयं वह
।। ब्रह्मैव परमं शुद्धं ब्रह्म चाहं सदाव्ययं ।।७।। सोपूर्णो निखिलस्यास्य कार्याकारणं च
स्फुतः ।। पुरुषोयं भवेदात्मा पूर्णत्वाद्योहयात्मनः ।।८।। इति वाक्यैर्यतः शास्ति सस
ब्रह्मैव केवलं ।। ब्रह्म सत्यं परं ज्ञात्वा मुच्यते जन्मबंधनात् ।।९।। इति सप्तदशो मंत्रः
समासेन निरूपितः ।। सत्यस्य परं सत्यं ब्रह्म सत्यस्यैव पादोहमां ।।१०।। इत्यावा
स्यरहस्यं तु ब्रह्मानंदविविनिर्मितं ।। ब्रह्मानंदमयं ज्ञात्वा मुच्यते सर्वबंधनात् ।।११।।
इशावास्यरहस्यं च भुक्तीर्थाप्तमेक्षुभे ।। रामानंदसरस्वत्या ।। छिरिवर्तीस्वात्म ...
लभ्यते ।।१२।। ब्रह्मैव सत्यं परमं विशुद्धं सर्वांतरस्थं स...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलमैं द्वितीयं तदेवाहं सनती विमुक्तः॥१३॥ ॥इति

नीयशाखोक्तं समाप्तं॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥श्रीपरब्रह्मणो

॥ ॥अर्जितं भूरिकष्टेन पुस्तकं लिखितं मया॥ हर्त्तुमिच्छति यः पापी तस्य वंशः क्षयो

भवेत्॥ ॥छ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०४

वे० ८७

॥ इति ईशावास्यकारिकटीका ॥

K K S U LIBRARY
RAMTEK
441 106
M1059
Dist. Nagpur

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.10.20 10:39
,TRANSFERRED=2020/10/26 at 10:42:05
,PAGES=13
,TYPE=STD
,NAME=S0004531
,Book Name=M-1059-ESHAVALKARIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection